Prepp
Your Personal Exams Guide

# PART—IV / भागः —IV

## LANGUAGE—I / भाषा—I
## Sanskrit / संस्कृतम्

अभ्यर्थिनः **चतुर्थभागस्य** (Part–IV) प्रश्नानाम् (प्र० सं० **91–120**) उत्तराणि दद्युः, यदि तैः **संस्कृतं प्रथमभाषा** (Language—I)-रूपेण चितम्।

**91.** अङ्किता इति अवबोधपूर्वकं विभिन्नाः षट्भाषाः भाषमाणे सक्षमा अस्ति। तस्याः भाषिकक्षमताकारणेन सा किं भवितुं शक्नोति?

(1) भाषाविद्
(2) बहुभाषाभाषिणी
(3) द्विभाषाभाषिणी
(4) एकभाषाभाषिणी

**92.** भवतां रुचिः कूटमिश्रणे, कूटपरिवर्तने, शिशुभाषायाः गुप्तभाषाणामध्ययने चास्ति।
उपर्युक्तानां समेषां विषयाणामध्ययनाय भवता कस्य विषयस्य अध्ययनं करणीयम्?

(1) मानवशास्त्रम्
(2) समाजशास्त्रम्
(3) सामाजिक-भाषाविज्ञानम्
(4) सांस्कृतिकमनोविज्ञानम्

**93.** अधोऽङ्कितेषु कः तुलनात्मकविश्लेषणस्य अंशो नास्ति?

(1) अर्थगतम् (Semantic)
(2) कोशविषयकम् (Lexical)
(3) स्वनिमिक इति (Phonological)
(4) वाक्यगतम् (Syntactic)

**94.** भवता दृष्टम्, यत् एका आङ्गलभाषायाः अध्यापिका कक्षायां स्वच्छन्देन मातृभाषां प्रयुङ्क्ते। सा कतमां प्रक्रियामनुसरति?

(1) व्याकरणानुवाद-प्रक्रियाम्
(2) संरचनात्मक-मौखिक-स्थिति-प्रक्रियाम्
(3) प्रत्यक्षविधिम्
(4) श्रव्य-भाषिकां प्रक्रियाम्

**95.** संक्षिप्तरूपेण लेखनस्य एका योग्यता, यस्यां निश्चितार्थं प्राप्तुं कान्यपि परिहार्याणि विवरणानि न समाविष्टाणि, कथ्यते—

(1) प्रक्रियालेखनम्
(2) टिप्पणी-ग्रहणम्
(3) टिप्पणी-निर्माणम्
(4) संक्षेपणम्

**96.** वाक्-अभिव्यक्तीनां मूल्यांकनं केन प्रभावशालिरूपेण क्रियते?

(1) शब्दचयनम् (Words selection)
(2) वाचः ध्वनिः (Tone of voice)
(3) वाणी (Vocals)
(4) वाचः गतिः (Speed of voice)

**97.** कक्षायाम् उपवेशनव्यवस्था शिथिलतायुता स्यात्। यतो हि—

(1) अनेन सारल्येन समूहनिर्माणम्, द्वयोः द्वयोः समूहनिर्माणम्, समग्रकक्षायाः गतिविधयश्च सम्पत्स्यन्ते
(2) अनेन छात्राः स्वासन्दान् स्वेच्छया यत्र कुत्रापि यदा च ते इच्छन्ति, नेतुं स्वतन्त्राः भवन्ति
(3) अनेन अध्यापिका स्वकक्षायां समानतायाः स्थापने समर्था भविष्यति
(4) अनेन बालकाः स्थायिमित्राणां समूहनिर्माणे अक्षमाः भविष्यन्ति

Prepp
Your Personal Exams Guide

**98.** प्राथमिकस्तरे पठनकौशलाकलनाय भाषायाः अध्यापकः प्राधान्येन कुत्र ध्यानं दद्यात्?

(1) विरामादि चिह्नानां प्रयोगे
(2) धाराप्रवाहरूपेण पठने
(3) अवबोधपूर्वकं पठने
(4) वर्णमालायाः अक्षराणां परिज्ञाने

**99.** प्रभावशाली-सम्प्रेषणार्थं किमस्ति महत्त्वपूर्णम्?

(1) निरन्तरं यत्र-तत्र गमनं, हाव-भाव-प्रदर्शनञ्च
(2) मनसि आगतानां विचाराणां कथनम्
(3) प्राक् अन्येषां वचनानां श्रवणम्
(4) नियमितेन अन्तरालेन अन्यैः सह हस्तक्षेपम्

**100.** आङ्गलभाषायाः व्याकरण-अध्यापनस्य किं मुख्यमुद्देश्यम्?

(1) भाषणे लेखने च विचाराणां सटीकतया सह तथा च तार्किकतया सह अभिव्यक्तेः योग्यतायाः विकासः
(2) नियमान् कण्ठस्थीकरणस्य योग्यतायाः विकासः
(3) अध्ययने रुच्याः विकासः
(4) स्वविचाराणां मौलिकतायाः वृद्धिः

**101.** प्राथमिकस्तरे शिक्षार्थिनां लेखनकौशलविकासार्थम् अध्यापिका स्वकीयछात्रान् कं विषयम् अधिकृत्य लेखनाय प्रोत्साहयेत्?

(1) धार्मिकविश्वासाः
(2) व्यक्तिगतजीवनम्
(3) सामाजिकसमस्याः
(4) राष्ट्रीयविषयम्

**102.** भवान् स्वकक्षायां छात्राणां सोपानीकरणार्थं तेषां व्यक्तिगतान्तरान् परिज्ञातुं इच्छति। एतदुद्देश्यं प्राप्तुं भवान् अधोलिखितेषु कस्य आकलनस्य प्रयोगं कुर्यात्?

(1) निदानात्मक-आकलनम्
(2) योगात्मक-आकलनम्
(3) रचनात्मक-आकलनम्
(4) सहपाठी-आकलनम्

**103.** चॉमस्की प्रतिपादयति यत् भाषायाः अर्जनस्य सहजाता क्षमता अस्माकम् अद्वितीयजैविकवंशानुक्रमस्य एव परिणामोऽस्ति। अस्य वंशानुक्रमस्य ज्ञानं कथं भवति?

(1) भाषायाः अर्जनक्षेत्रेण
(2) भाषायाः स्वीकारेच्छया
(3) भाषायाः अर्जन-उपकरणेन
(4) भाषायाः अनुकूलनपदेन

**104.** भाषायां ध्वनेः लघुतमः सार्थकः एककः किं भवति?

(1) स्वनिम् (Phoneme)
(2) रूपिम् (Morpheme)
(3) वाक्यविज्ञानम् (Syntax)
(4) अर्थतत्त्वम् (Semantics)

**105.** मासद्वयस्य मासत्रयस्य वा शिशवः मुक्तस्वरेण ध्वनीनामुच्चारणं कुर्वन्ति। अधोऽङ्कितेषु कस्येदमुदाहरणम्?

(1) अव्यक्तवाक् (Babbling)
(2) क्रोशः (Shouting)
(3) एकशब्दीय-उच्चारणम् (One-word utterances)
(4) कूजनम् (Cooing)

Prepp
Your Personal Exams Guide

**निर्देशः** —अधोलिखितान् श्लोकान् पठित्वा प्रश्नानां (**106–111**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

सर्वहिंसानिवृत्ता ये नराः सर्वे सहाश्च ये।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः॥

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति॥

योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते॥

मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते।
शक्यते नानुमानेन परेण परिवर्णितुम्॥

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

**106.** मृत्योरनन्तरं परलोके किं सार्धं गच्छति?
(1) परोपकारः
(2) सत्यम्
(3) धर्मः
(4) दानम्

**107.** वसुधा एव अस्माकं परिवारोऽस्ति, इति के मन्यन्ते?
(1) परोपकारिणः
(2) संन्यासिनः
(3) परिव्राजकाः
(4) उदारचरितः

**108.** लघुचेतसां विचाराणि कीदृशानि भवन्ति?
(1) वयं सर्वेषु श्रेष्ठाः
(2) सर्वमेव धनं अस्ति अस्माकम्
(3) अयं निजः अयं परः
(4) सर्वे जनाः स्वार्थिनः सन्ति

**109.** 'वसुधैव' अस्मिन् पदे का सन्धिः?
(1) अच्सन्धिः
(2) विसर्गसन्धिः
(3) यण्सन्धिः
(4) हल्सन्धिः

**110.** 'प्राणैर्विमुच्यते' अस्मिन् पदे का सन्धिः?
(1) अच्सन्धिः
(2) विसर्गसन्धिः
(3) हल्सन्धिः
(4) यण्सन्धिः

**111.** हिंसारहिता नराः किं प्राप्नुवन्ति?
(1) स्वर्गम्
(2) सौहार्दम्
(3) सम्मानम्
(4) शान्तिम्

**निर्देशः** —अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (**112–120**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

आसीत् पुरा माधवो नाम कश्चिद् गोपालकः। तस्य गृहे नन्दिनी नामैका गौः आसीत्। तस्याः दुग्धं विक्रीय सः सुखेन जीवनं यापयति स्म। एकदा तस्य भागिनेयः तत्रागत्य सूचितवान्—मातुल! ''प्रतिवेशिनः श्रेष्ठिनः गृहे मासानन्तरम् एकः यज्ञः संपत्स्यते। तस्मिन् उत्सवे पञ्चाशत् किलोमितस्य क्षीरस्य आवश्यकता भविष्यति।'' इदमाकर्ण्य माधवः अचिन्तयत्—''पञ्चाशत् किलोमितं पयः; अस्तु दास्यामि। एतावन्मात्रं पयः विक्रीय बहुधनं प्राप्स्ये, येन एकस्य भवनस्य निर्माणं करिष्यामि''।

अथ प्रसन्नः माधवः स्वधेनुम् अहर्निशं सेवते। सः तस्याः रज्जुं धृत्वा तस्यै तृप्तिपर्यन्तं प्रभूतं घासादिकं ददाति, जलं पाययति, विषाणयोः तैलं करोति। प्रातः सायं च तां तिलकं करोति। यदा-कदा गुडादिकमपि भोजयति। स सर्वदा चिन्तयामास ''**एकवारं ग्रहीष्यामि पयोऽस्या प्राज्यमुत्सवे**''।

इत्थं सेवानिरतस्य तस्य एकः मासः व्यतीतः। अस्मिन्नन्तरे तस्य भार्या मालती पितृगृहात् प्रत्यावर्तत। माधवः तां तत्सर्वं विस्तरेण अकथयत्। तौ सत्वरं कुम्भकारस्य गृहाद् घटदशकं क्रीतवन्तौ। तदैव प्रतिवेशी दुग्धाय तम् आकारयत्। माधवस्तु सपदि पञ्चोपचारैः गाम् अपूजयत्। पात्रहस्तः दोहनाय गोः समीपम् अगच्छत्। मासैकपर्यन्तं दुग्धस्य अदोहनात् दुग्धहीना सा माधवहस्ते पात्रं दृष्ट्वैव अकूर्दत्। माधवः पौनःपुन्येन प्रार्थयति—''नन्दिनि! कथं मां व्याकुलयसि? पञ्चाशत् किलोमितं क्षीरं सत्वरं यच्छ''।

पौनःपुन्येन दोग्धुं प्रयतमानं माधवं सा पृष्ठपादाभ्यां ताडयित्वा रक्तरञ्जितमकरोत्। तं तादृशावस्थायां वीक्ष्य मालती मूर्च्छिता जाता। बहुभिः उपचारैः तस्याः मूर्च्छां दूरीकृत्य माधवः ताम् अकथयत् मासान्तेऽहं धनी भविष्यामि इति चिन्तयित्वैव मासपर्यन्तं मया धेनुरेव न दुग्धा। अस्मात् कारणादियं दुग्धहीनाऽभवत्। देवि! भविष्यचिन्तायां तु मया स्वकीयं वर्तमानमपि विनाशितम्। एभिः रक्तबिन्दुभिः मम चक्षुरुन्मीलितं यत् लघ्वपि कार्यम् अविचार्य न कर्तव्यम्।

**112.** ''पञ्चाशत् किलोमितं पयः'' इत्यत्र 'पयः' इति शब्दः कस्मिल्लिङ्गे वर्तते?

(1) स्त्रीलिङ्गे (2) पुल्लिङ्गे
(3) स्त्रीलिङ्गे पुल्लिङ्गे च (4) नपुंसकलिङ्गे

**113.** ''विषाणयोः तैलं करोति'' इत्यत्र 'विषाणः' इत्यस्य कोऽर्थः प्रस्तुतप्रसङ्गे?

(1) क्षुरः (2) केशः
(3) शृङ्गः (4) पुच्छः

**114.** 'सः' शब्दस्य निष्पत्तिर्भवति—

(1) तद् + सु + पुल्लिङ्गे (2) यद् + सु + पुल्लिङ्गे
(3) तद् + सु + नपुंसकलिङ्गे (4) सद् + सु + पुल्लिङ्गे

**115.** तौ कुम्भकारस्य गृहात् कति घटकानि क्रीतवन्तौ?

(1) सप्त (2) दशः
(3) पञ्च (4) द्वादशः

**116.** अधोऽङ्कितेषु क्षीरस्य पर्यायवाचिशब्दोऽस्ति—

(1) पयः (2) दधि
(3) संयावः (4) घृतम्

**117.** नन्दिनी इति कस्य नाम?

(1) माधवस्य स्त्रियाः (2) माधवस्य दुहितुः
(3) माधवस्य मातुः (4) माधवस्य गोः

**118.** ''भविष्यचिन्तायां तु मया स्वकीयं वर्तमानमपि विनाशितम्'' इति कस्य कथनम्?

(1) भागिनेयस्य (2) माधवस्य
(3) रामगोपालस्य (4) दुहितुः

**119.** ''लघ्वपि कार्यम् अविचार्य न कर्तव्यम्'' इत्यत्र 'कर्तव्यम्' इत्यस्य निष्पत्तिर्भवति—

(1) कृ + तव्यत् (2) कृ + यत्
(3) कृत + क्यप् (4) किर् + तव्यत्

**120.** मालती केन कारणेन मूर्च्छिता सञ्जाता?

(1) मृतां गाम् अवलोक्य (2) मृतं पुत्रम् अवलोक्य
(3) माधवं रक्तरञ्जितमवलोक्य (4) माधवं मृतमवलोक्य

Prepp
Your Personal Exams Guide

# PART—V / भागः —V

## LANGUAGE—II / भाषा—II
## Sanskrit / संस्कृतम्

अभ्यर्थिनः **पञ्चमभागस्य** (Part–V) प्रश्नानाम् (प्र० सं० **121–150**) उत्तराणि दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा** (Language—II)-रूपेण चितम्।

**121.** केनापि बालकेन मातृभाषायाः अधिगमः सामान्यतया किं मन्यते?

(1) भाषायाः अधिगमः

(2) भाषायाः आत्मसात्करणम्

(3) अमूर्त-भाषा-विकासः

(4) भाषायाः अधिग्रहणम्

**122.** एकः सक्रियश्रोता तत्क्षणमेव अवगच्छति—

(1) यत्किञ्चित् अपि वक्ता कथितुं प्रयतते

(2) अपरः व्यक्तिः किं कथयति

(3) वक्ता किं वक्तुमिच्छति

(4) तस्मिन्निहिततर्कः, यत् कथनं वक्ता वक्तुम् इच्छति

**123.** कक्षायां काव्यं पाठनाय अध्यापकः सर्वादौ कवितां पठति, अनन्तरं तेन छात्राः समूहकार्ये नियोजिताः। एकेन समूहेन कवितायाः विषयः लिखितः, अपरेण समूहेन मुख्य पात्रस्य वर्णनाय चित्रं चित्रितम्, तथा च तृतीयेन समूहेन कवितायाः सारांशो लिखितः। अस्य गतिविधेः किमुद्देश्यम्?

(1) कक्षायां सर्वान् छात्रान् संलग्नीकर्तुम्

(2) शिक्षार्थिनां विविधाः योग्यताः रुचीः च पोषणाय

(3) शिक्षार्थिनः आकलनार्थं सज्जीकरणम्

(4) शिक्षार्थिनां ध्यानं भङ्गीकरणम्

**124.** द्वितीयभाषाकक्षा सामान्यतया विविधभाषासमेकिता वर्तते। एतादृश्यां कक्षायाम् अध्यापकानां भूमिका छात्राणां कृते किं प्रदाने भवति?

(1) अपेक्षितकौशलान् संवर्धयितुं सुविधाजनकपर्यावरणम्

(2) पाठ्यस्य सारांशः सरलीकृतस्वरूपः च

(3) पर्याप्तस्वव्याख्यात-सामग्री

(4) समग्रपाठ्यक्रमयुक्तानि विविधकार्यविषयकानि कार्यपत्राणि

Prepp
Your Personal Exams Guide

**125.** भवता एतादृशं परीक्षापत्रकं निर्मितं येन भवताम् अपेक्षा अस्ति यत् छात्राः कालरूपाणाम् (लकाररूपाणाम्) योजकचिह्नानां कारकाणां विशेषणानाञ्च उचितं प्रयोगं ज्ञापयेयुः। भवता अस्यां परीक्षायां कतम उपागमः प्रयुक्तः?

(1) अप्रत्यक्षव्याकरणपरीक्षणम्
(2) मिश्रितव्याकरणकार्यम्
(3) समेकितव्याकरणपरीक्षणम्
(4) प्रत्यक्षव्याकरणपरीक्षणम्

**126.** शिशवः प्रारम्भिकायामवस्थायां भित्तिकायाम्, भूमौ, कार्यपुस्तिकायाञ्च अस्पष्टाक्षरैर् लिखन्ति। भाषायाः अधिगमस्य एषा अवस्था कथ्यते——

(1) उद्गामी-साक्षरता
(2) लेखनकौशलम्
(3) लेखनचित्रविकासः
(4) अस्पष्टाक्षरम्

**127.** सम्प्रेषणात्मकं भाषाशिक्षणं कस्यां पारस्परिकनिर्भतायां बलं ददाति?

(1) भाषा वार्तालापश्च
(2) भाषा व्यवहारश्च
(3) भाषा मनोविज्ञानश्च
(4) भाषा सम्प्रेषणश्च

**128.** भवान् स्वकीयायाः कक्षायाः छात्राणाम् अधिगमप्रक्रियायाः उपाख्यानात्मकानि-अभिलेखानि गृहीतुमिच्छति। उद्देश्यमिदं प्राप्तुं अधोऽङ्कितेषु किमुपयुक्तम्?

(1) परियोजना-विधिः
(2) मौखिक-विधिः
(3) अवलोकन-विधिः
(4) प्रदत्तकार्य-विधिः

**129.** अधोऽङ्कितेषु व्याकरणसन्दर्भे किमुचितम्?

(1) व्याकरणं नियमसमूहान् प्रस्तौति, यानि नियमानि व्यवहारात्पूर्वं कण्ठस्थीकरणीयानि
(2) व्याकरणं भाषाणां व्यवस्था अस्ति, यत् अस्माकं वाचनलेखनकौशलान् परिष्करोति
(3) विदेशीयभाषाया अधिगमे नास्ति कापि भूमिका व्याकरणस्य
(4) वाक्प्रवाहे व्याकरणस्य ज्ञानं सहायकं भवति

**130.** यदा शिशवः अल्पायु-बालाश्च एतादृशे परिवेशे वसन्ति यत्र तेषां भाषां प्रति उद्घाटनम् (Exposure) अनुभवो वा न वर्तते, तेषां भाषाविकासः प्रकृष्टरूपेण बाधितः भवति। एता बाधकता अपरिवर्तनीया भवति। एतां व्याख्यां कतमा पदावली समर्थ्यति?

(1) विकासस्य संवेदनशीलावस्थाः
(2) सामाजिकभाषिकता (Sociolinguistics)
(3) अर्थविज्ञानम् (Semantics)
(4) सहजवादः (Nativism)

**131.** व्याकरणस्य शिक्षणं केन प्रकारेण स्यात्?

(1) शिक्षार्थिभ्यो लिखितं कार्यं कारयित्वा
(2) नियमकण्ठस्थीकरणाय छात्राणाम् उत्साहवर्धनम्
(3) छात्रेभ्यः पर्याप्तं कार्यप्रदानम्
(4) सन्दर्भे अभ्यासस्य अवसरप्रदानेन

Prepp
Your Personal Exams Guide

**132.** भवान् स्वकक्षायाम् एकं भाषासमृद्धवातावरणं निर्मातुमिच्छति। एतदर्थं भवता किं कर्तव्यम्?

(1) स्वकक्षायां भाषाप्रयोगशालायाः स्थापनम्

(2) भाषाक्रीडाः भाषागतिविधीः च क्रेतुं अभिभावकानां मनोबलवर्धनम्

(3) तादृशम् अवसरप्रदानं यत्र छात्रैः भाषा दृश्यते सूच्यते प्रयुज्यते च

(4) कक्षायां सम्प्रेषणकाले छात्रैः आङ्गलभाषा एव प्रयोक्तव्या एतदर्थं छात्राणाम् उत्साहवर्धनम्

**133.** द्वितीयायाः भाषायाः अधिगमसिद्धान्ते—अर्जनम्, अवलोकनम्, स्वाभाविकम्, निवेशः, प्रधानापरिकल्पना एतादृशी शब्दावली केन प्रदत्ता?

(1) स्टीवनपिंकर
(2) चॉमस्की
(3) स्टीफन क्रेशन्
(4) वायगोत्सकी

**134.** अधोलिखितेषु कस्मिन् स्तरनिर्धारणस्य क्रमस्य च सिद्धान्तः संलग्नः वर्तते?

(1) स्तरनिर्धारणम् (Gradation)
(2) अभ्यासनिर्माणम् (Habit formation)
(3) स्वाभाविकमार्गस्यानुसरणम्
(4) नियन्त्रिता-शब्दावलिः

**135.** भवतां संज्ञाने आगतं यत् छात्रेभ्यः लक्ष्यभाषायाः कतिपयानि उदाहरणानि प्रस्तोतव्यानि, तथा च ते तेषां अनुकरणं करणाय प्रतिक्रियाप्रदानाय च प्रोत्साहनीयाः। उद्देश्यमिदं प्राप्तुं अधोऽङ्कितेषु कः विधिः सर्वोपयुक्तोऽस्ति?

(1) सम्प्रेषणात्मकं भाषाशिक्षणम्
(2) श्रव्यभाषिकविधिः
(3) व्याकरणानुवादविधिः
(4) प्रत्यक्षविधिः

**निर्देशः** —अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (**136–142**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

आदिगुरोः शङ्कराचार्यस्य जन्म केरलप्रान्ते कालडीनामके ग्रामे अभवत्। अस्य पितुः नाम शिवगुरुः आसीत्। अस्य जन्मनः प्रागेव सः दिवंगतः। माता आर्याम्बा एवास्य पालनमकरोत्। जन्मनैव प्रतिभासम्पन्नतया स कुलोचिताः विद्याः शीघ्रमेव अधीतवान्। मनसा, वचसा कर्मणा च विरक्तः शङ्करः मातरं संन्यासस्यानुमतिम् अयाचत्। पुत्रस्नेहपरवशा सा शङ्करस्य इमां प्रार्थनां न स्वीकृतवती।

एकदा शङ्करः नद्यां स्नातुं गतः। तत्र नक्रेण गृहीतः स उच्चैः आक्रोशत्। आक्रोशं श्रुत्वा माता नदीतीरं गता पुत्रं च नक्रेण गृहीतम् अपश्यत्। शङ्करः अवदत्—''अम्ब! यदि संन्यासं ग्रहीतुं मामनुमंस्यसे तर्हि अहं नक्रात् मुक्तो भविष्यामि।'' अनिच्छन्त्यपि माता—''वत्स! यथा तुभ्यं रोचते तथा कुरु'' इति कष्टेनाकथयत्। एतच्छ्रुत्वा शङ्करः नक्रात् मुक्तः अभवत्। नद्याः बहिर्निर्गत्य मातुः चरणयोः प्रणामं कृत्वा सः अवदत्, ''मातः! यद्यपि गच्छाम्यहं संन्यासाय तथापि यदैव त्वं मां स्मरिष्यसि तदैव उपस्थितो भविष्यामि।'' एवं प्रतिज्ञाय गृहात् निरगच्छत्।

अथ परिव्राजकैः सह देशाद्देशं पर्यटन् शङ्करः काश्यां गोविन्दपादाचार्येभ्यः वेदान्तविद्यामधीतवान्। अनन्तरं मुख्यानाम् उपनिषदां ब्रह्मसूत्राणां श्रीमद्भगवद्गीतायाश्च भाष्याणि अरचयत्। अनेन विरचितानि बहूनि स्तोत्रकाव्यान्यपि सन्ति येषु भजगोविन्दस्तोत्रम् अतीव लोकप्रियमस्ति।

एवं मन्यते यत् मरणासन्ना माता यदैवास्य स्मरणं अकरोत् तदैवायं तत्समीपम् आगच्छत्। दिवंगतायां मातरि संन्यस्तोऽपि सः पुत्रोचितं सर्वं कृत्यं सम्पादितवान्। ततः सर्वतः परिभ्रमन् स जनेभ्यः अद्वैतवेदान्तसिद्धान्तस्य ज्ञानमुपदिष्टवान्। अस्मिन्नेव प्रचारक्रमे स द्वारिकायां बदर्यां जगन्नाथपुर्यां शृङ्गेर्यां च चतुरः मठान् समस्थापयत्। अन्ते च द्वात्रिंशे एव वयसि स ब्रह्मभावम् उपगतः।

**136.** शङ्कराचार्यस्य निर्वाणं कस्यामवस्थायामभवत्?

(1) द्वाविंशे वर्षे
(2) त्रयस्त्रिंशे वर्षे
(3) चत्वारिंशे वर्षे
(4) द्वात्रिंशे वर्षे

Prepp
Your Personal Exams Guide

यद्यपि निरीक्षकस्य ध्यानम् अन्यत्र आसीत् तथापि मोहनः सम्मुखमवलोकयन् अपि शिक्षकस्य अनुकरणं नाकरोत्। सहपाठिनाम् उपहासभूमिः भविष्यामि शिक्षकस्य कोपभाजनताञ्च गमिष्यामि इत्यपि सः नाचिन्तयत्। सः जानाति स्म यद् वञ्चनातः सत्यस्य गोपनं कदापि भवितुं नार्हति।

कक्षाया अनन्तरं मोहनस्य शिक्षकः तस्मै अकुप्यत्, सहपाठिनश्च तस्योपहासम् अकुर्वन्। यदायं गृहं परावर्तत तदात्मानं क्षतम् अवसन्नञ्च अन्वभवत्। परं गभीरे अन्तरात्मनि स्वसङ्कल्पं स्मारं स्मारं नवां द्युतिं नवं सामर्थ्यञ्च अधिगतवान्।

अत एवोक्तम्—

सत्यान्नास्ति परं तपः॥

**143.** 'अरोदीत्' इत्यस्मिन् पदे को धातुः कश्च लकारः किञ्च वचनम्?

(1) रुधिर् धातुः, लुङ्लकारः मध्यमपुरुषैकवचनम्
(2) रुद् धातुः, लङ्लकारः प्रथमपुरुषैकवचनम्
(3) रुद् धातु, लङ्लकारः उत्तमपुरुषैकवचनम्
(4) रुद् धातुः, लुङ्लकारः उत्तमपुरुषैकवचनम्

**144.** विद्यालयस्य निरीक्षकस्य परीक्षायां केन शुद्धं वर्णं न लिखितम्?

(1) विठ्ठलरावेण
(2) बालिकया
(3) छात्रेण
(4) मोहनदासेन

**145.** ''चेतसि महत् परिवर्तनं सञ्जातम्'' इत्यत्र 'सञ्जातम्' इत्यस्य पदस्य निष्पत्तिर्भवति—

(1) सम् + जन् + क्त
(2) सम् + जॄ + क्त
(3) सम् + जन् + टाप्
(4) सम् + ज्ञा + क्त

**146.** ''स्वसङ्कल्पं स्मारं स्मारं नवां द्युतिम्'' इत्यत्र 'स्मारं स्मारम्' इत्यत्र कः प्रत्ययः?

(1) तुमुन्
(2) मतुप्
(3) णमुल्
(4) ण्वुल्

**147.** ''नवं सामर्थ्यञ्च अधिगतवान्'' इत्यत्र 'अधिगतवान्' इत्यस्मिन् पदे कः प्रत्ययः?

(1) मतुप्
(2) क्तवतु
(3) शानच्
(4) शैषिक

**148.** ''सः जानाति स्म'' इत्यत्र 'सः' इत्यस्य निष्पत्तिर्भवति—

(1) 'तद्'-शब्दस्य एकवचनं पुल्लिङ्गे
(2) 'तद्'-शब्दस्य द्विवचनं पुल्लिङ्गे
(3) 'सद्'-शब्दस्य एकवचनं पुल्लिङ्गे
(4) 'तद्'-शब्दस्य एकवचनं स्त्रीलिङ्गे

**149.** किमस्ति परं तपः?

(1) सत्यम्
(2) अहिंसा
(3) ब्रह्मचर्यम्
(4) अस्तेयम्

**150.** मोहनदासः किं दृष्ट्वा चिरम् अरोदीत्?

(1) विद्यालयस्य निरीक्षकम्
(2) अध्यापकम्
(3) मित्रस्य मृत्युम्
(4) राज्ञः हरिश्चन्द्रस्य नाटकम्

